# Shivabhujangam

# શ્રીશિવભુજઙ્ગમ્ અથવા શિવસ્તુતિઃ

## Document Information

Text title : shivabhuja.ngam

File name : shivabhujangam.itx

Category : shiva, bhujanga, shankarAchArya, vedanta

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Kamakshi kAmAkShi7 at gmail.com

Proofread by : Kamakshi kAmAkShi7 at gmail.com

Latest update : July 12, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 24, 2023

*sanskritdocuments.org*

# શ્રીશિવભુજઙ્ગમ્ અથવા શિવસ્તુતિઃ

ગલદ્દાનગણ્ડં મિલદ્ભૃઙ્ગષણ્ડં
    ચલચ્ચારુશુણ્ડં જગત્ત્રાણશૌણ્ડમ્ ।
કનદ્દન્તકાણ્ડં વિપદ્ભઙ્ગચણ્ડં
    શિવપ્રેમપિણ્ડં ભજે વક્રતુણ્ડમ્ ॥ ૧॥

અનાદ્યન્તમાદ્યં પરં તત્ત્વમર્થં
    ચિદાકારમેકં તુરીયં ત્વમેયમ્ ।
હરિબ્રહ્મમૃગ્યં પરબ્રહ્મરૂપં
    મનોવાગતીતં મહઃશૈવમીડે ॥ ૨॥

સ્વશક્ત્યાદિશક્ત્યન્તસિંહાસનસ્થં
    મનોહારિસર્વાઙ્ગરત્નોરુભૂષમ્ ।
જટાહીન્દુગઙ્ગાસ્થિશમ્યાકમૌલિં
    પરાશક્તિમિત્રં નુમઃ પઞ્ચવક્ત્રમ્ ॥ ૩॥

શિવેશાનતત્પૂરુષાઘોરવામા-
    દિભિઃ પઞ્ચભિર્હૃન્મુખૈઃ ષડ્ભિરઙ્ગૈઃ ।
અનૌપમ્ય ષટ્ત્રિંશતં તત્ત્વવિદ્યા-
    મતીતં પરં ત્વાં કથં વેત્તિ કો વા ॥ ૪॥

પ્રવાલપ્રવાહપ્રભાશોણમર્ધં
    મરુત્વન્મણિશ્રીમહઃશ્યામમર્ધમ્ ।
ગુણસ્યૂતમેતદ્વપુઃ શૈવમન્તઃ
    સ્મરામિ સ્મરાપત્તિસમ્પત્તિહેતોઃ ॥ ૫॥

સ્વસેવાસમાયાતદેવાસુરેન્દ્રા-
    નમન્મૌલિમન્દારમાલાભિષિક્તમ્ ।
નમસ્યામિ શમ્ભો પદામ્ભોરુહં તે
    ભવામ્ભોધિપોતં ભવાનીવિભાવ્યમ્ ॥ ૬॥

જગન્નાથ મન્નાથ ગૌરીસનાથ
    પ્રપન્નાનુકમ્પિન્વિપન્નાર્તિહારિન્ ।
મહઃસ્તોમમૂર્તે સમસ્તૈકબન્ધો
    નમસ્તે નમસ્તે પુનસ્તે નમોઽસ્તુ ॥ ૭॥

વિરૂપાક્ષ વિશ્વેશ વિશ્વાદિદેવ
    ત્રયીમૂલ શમ્ભો શિવ ત્ર્યમ્બક ત્વમ્ ।
પ્રસીદ સ્મર ત્રાહિ પશ્યાવમુક્ત્યૈ
    ક્ષમાં પ્રાપ્નુહિ ત્ર્યક્ષ માં રક્ષ મોદાત્॥ ૮॥

મહાદેવ દેવેશ દેવાદિદેવ
    સ્મરારે પુરારે યમારે હરેતિ ।
બ્રુવાણઃ સ્મરિષ્યામિ ભક્ત્યા ભવન્તં
    તતો મે દયાશીલ દેવ પ્રસીદ ॥ ૯॥

ત્વદન્યઃ શરણ્યઃ પ્રપન્નસ્ય નેતિ
    પ્રસીદ સ્મરન્નેવ હન્યાસ્તુ દૈન્યમ્ ।
ન ચેત્તે ભવેદ્ભક્તવાત્સલ્યહાનિ-
    સ્તતો મે દયાલો સદા સંનિધેહિ ॥ ૧૦॥

અયં દાનકાલસ્ત્વહં દાનપાત્રં
    ભવાનેવ દાતા ત્વદન્યં ન યાચે ।
ભવદ્ભક્તિમેવ સ્થિરાં દેહિ મહ્યં
    કૃપાશીલ શમ્ભો કૃતાર્થોઽસ્મિ તસ્માત્॥ ૧૧॥

પશું વેત્સિ ચેન્માં તમેવાધિરૂઢઃ
    કલઙ્કીતિ વા મૂર્ધ્નિ ધત્સે તમેવ ।
દ્વિજિહ્વઃ પુનઃ સોઽપિ તે કણ્ઠભૂષા
    ત્વદઙ્ગીકૃતાઃ શર્વ સર્વેઽપિ ધન્યાઃ ॥ ૧૨॥

ન શક્નોમિ કર્તું પરદ્રોહલેશં
    કથં પ્રીયસે ત્વં ન જાને ગિરીશ ।
તથાહિ પ્રસન્નોઽસિ કસ્યાપિ કાન્તા-
    સુતદ્રોહિણો વા પિતૃદ્રોહિણો વા ॥ ૧૩॥

સ્તુતિં ધ્યાનમર્ચાં યથાવદ્વિધાતું

ભજન્નપ્યજાનન્મહેશાવલમ્બે ।
ત્રસન્તં સુતં ત્રાતુમગ્રે મૃકણ્ડો-
ર્યમપ્રાણનિર્વાપણં ત્વત્પદાબ્જમ્ ॥ ૧૪॥

શિરોદૃષ્ટિહૃદ્રોગશૂલપ્રમેહ-
જ્વરાર્શોજરાયક્ષ્મહિક્કાવિષાર્તાન્ ।
ત્વમાદ્યો ભિષગ્ભેષજં ભસ્મ શમ્ભો
ત્વમુલ્લાઘયાસ્માન્વપુર્લાઘવાય ॥ ૧૫॥

દરિદ્રોઽસ્મ્યભદ્રોઽસ્મિ ભગ્નોઽસ્મિ દૂયે
વિષણ્ણોઽસ્મિ સન્નોઽસ્મિ ખિન્નોઽસ્મિ ચાહમ્ ।
ભવાન્પ્રાણિનામન્તરાત્માસિ શમ્ભો
મમાધિં ન વેત્સિ પ્રભો રક્ષ માં ત્વમ્ ॥ ૧૬॥

ત્વદક્ષ્ણોઃ કટાક્ષઃ પતેત્ત્ર્યક્ષ યત્ર
ક્ષણં ક્ષ્મા ચ લક્ષ્મીઃ સ્વયં તં વૃણાતે ।
કિરીટસ્ફુરચ્ચામરચ્છત્રમાલા-
કલાચીગજક્ષૌમભૂષાવિશેષૈઃ ॥ ૧૭॥

ભવાન્યૈ ભવાયાપિ માત્રે ચ પિત્રે
મૃડાન્યૈ મૃડાયાપ્યઘઘ્ન્યૈ મખઘ્ને ।
શિવાઙ્ગ્યૈ શિવાઙ્ગાય કુર્મઃ શિવાયૈ
શિવાયામ્બિકાયૈ નમસ્ત્ર્યમ્બકાય ॥ ૧૮॥

ભવદ્ગૌરવં મલ્લઘુત્વં વિદિત્વા
પ્રભો રક્ષ કારુણ્યદૃષ્ટ્યાનુગં મામ્ ।
શિવાત્માનુભાવસ્તુતાવક્ષમોઽહં
સ્વશક્ત્યા કૃતં મેઽપરાધં ક્ષમસ્વ ॥ ૧૯॥

યદા કર્ણરન્ધ્રં વ્રજેત્કાલવાહ-
દ્વિષત્કણ્ઠઘણ્ટાઘણાત્કારનાદઃ ।
વૃષાધીશમારુહ્ય દેવૌપવાહ્યં
તદા વત્સ મા ભીરિતિ પ્રીણય ત્વમ્ ॥ ૨૦॥

યદા દારુણાભાષણા ભીષણા મે
ભવિષ્યન્ત્યુપાન્તે કૃતાન્તસ્ય દૂતાઃ ।
તદા મન્મનસ્ત્વત્પદામ્ભોરુહસ્થં

કથં નિશ્ચલં સ્યાન્નમસ્તેઽસ્તુ શમ્ભો ॥ ૨૧॥

યદા દુર્નિવારવ્યથોઽહં શયાનો
લુઠન્નિઃશ્વસન્નિઃસૃતાવ્યક્તવાણિઃ ।
તદા જહ્નુકન્યાજલાલઙ્કૃતં તે
જટામણ્ડલં મન્મનોમન્દિરં સ્યાત્॥ ૨૨॥

યદા પુત્રમિત્રાદયો મત્સકાશે
રુદન્ત્યસ્ય હા કીદૃશીયં દશેતિ ।
તદા દેવદેવેશ ગૌરીશ શમ્ભો
નમસ્તે શિવાયેત્યજસ્રં બ્રવાણિ ॥ ૨૩॥

યદા પશ્યતાં મામસૌ વેત્તિ નાસ્મા-
નયં શ્વાસ એવેતિ વાચો ભવેયુઃ ।
તદા ભૂતિભૂષં ભુજઙ્ગાવનદ્ધં
પુરારે ભવન્તં સ્ફુટં ભાવયેયમ્ ॥ ૨૪॥

યદા યાતનાદેહસન્દેહવાહી
ભવેદાત્મદેહે ન મોહો મહાન્મે ।
તદા કાશશીતાંશુસઙ્કાશમીશ
સ્મરારે વપુસ્તે નમસ્તે સ્મરાણિ ॥ ૨૫॥

યદાપારમચ્છાયમસ્થાનમદ્ભિ-
ર્જનૈર્વા વિહીનં ગમિષ્યામિ માર્ગમ્ ।
તદા તં નિરુન્ધન્કૃતાન્તસ્ય માર્ગં
મહાદેવ મહ્યં મનોજ્ઞં પ્રયચ્છ ॥ ૨૬॥

યદા રૌરવાદિ સ્મરન્નેવ ભીત્યા
વ્રજામ્યત્ર મોહં મહાદેવ ઘોરમ્ ।
તદા મામહો નાથ કસ્તારયિષ્ય-
ત્યનાથં પરાધીનમર્ધેન્દુમૌલે ॥ ૨૭॥

યદા શ્વેતપત્રાયતાલઙ્ઘ્યશક્તેઃ
કૃતાન્તાદ્ભયં ભક્તવાત્સલ્યભાવાત્ ।
તદા પાહિ માં પાર્વતીવલ્લભાન્યં
ન પશ્યામિ પાતારમેતાદૃશં મે ॥ ૨૮॥

ઇદાનીમિદાનીં મૃતિર્મે ભવિત્રી-
    ત્યહો સન્તતં ચિન્તયા પીડિતોઽસ્મિ ।
કથં નામ મા ભૂન્મૃતૌ ભીતિરેષા
    નમસ્તે ગતીનાં ગતે નીલકણ્ઠ ॥ ૨૯॥

અમર્યાદમેવાહમાબાલવૃદ્ધં
    હરન્તં કૃતાન્તં સમીક્ષ્યાસ્મિ ભીતઃ ।
મૃતૌ તાવકાઙ્ઘ્ર્યબ્જદિવ્યપ્રસાદા-
    દ્ભવાનીપતે નિર્ભયોઽહં ભવાનિ ॥ ૩૦॥

જરાજન્મગર્ભાધિવાસાદિદુઃખા-
    ન્યસહ્યાનિ જહ્યાં જગન્નાથ દેવ ।
ભવન્તં વિના મે ગતિર્નૈવ શમ્ભો
    દયાલો ન જાગર્તિ કિં વા દયા તે ॥ ૩૧॥

શિવાયેતિ શબ્દો નમઃપૂર્વ એષ
    સ્મરન્મુક્તિકૃન્મૃત્યુહા તત્ત્વવાચી ।
મહેશાન મા ગાન્મનસ્તો વચસ્તઃ
    સદા મહ્યમેતત્પ્રદાનં પ્રયચ્છ ॥ ૩૨॥

ત્વમપ્યમ્બ માં પશ્ય શીતાંશુમૌલિ-
    પ્રિયે ભેષજં ત્વં ભવવ્યાધિશાન્તૌ ।
બહુક્લેશભાજં પદામ્ભોજપોતે
    ભવાબ્ધૌ નિમગ્નં નયસ્વાદ્ય પારમ્ ॥ ૩૩॥

અનુદ્યલ્લલાટાક્ષિવહ્નિપ્રરોહૈ-
    રવામસ્ફુરચ્ચારુવામોરુશોભૈઃ ।
અનઙ્ગભ્રમદ્ભોગિભૂષાવિશેષૈ-
    રચન્દ્રાર્ધચૂડૈરલં દૈવતૈર્નઃ ॥ ૩૪॥

અકણ્ઠેકલઙ્કાદનઙ્ગેભુજઙ્ગા-
    દપાણૌકપાલાદફાલેનલાક્ષાત્ ।
અમૌળૌશશાઙ્કાદવામેકલત્રા-
    દહં દેવમન્યં ન મન્યે ન મન્યે ॥ ૩૫॥

મહાદેવ શમ્ભો ગિરીશ ત્રિશૂલિમ્-
    સ્ત્વદીયં સમસ્તં વિભાતીતિ યસ્માત્ ।

શિવાદન્યથા દૈવતં નાભિજાને
    શિવોઽહં શિવોઽહં શિવોઽહં શિવોઽહમ્ ॥ ૩૬॥

યતોઽજાયતેદં પ્રપઞ્ચં વિચિત્રં
    સ્થિતિં યાતિ યસ્મિન્યદેકાન્તમન્તે ।
સ કર્માદિહીનઃ સ્વયઞ્જ્યોતિરાત્મા
    શિવોઽહં શિવોઽહં શિવોઽહં શિવોઽહમ્ ॥ ૩૭॥

કિરીટે નિશેશો લલાટે હુતાશો
    ભુજે ભોગિરાજો ગલે કાલિમા ચ ।
તનૌ કામિની યસ્ય તત્તુલ્યદેવં
    ન જાને ન જાને ન જાને ન જાને ॥ ૩૮॥

અનેન સ્તવેનાદરાદમ્બિકેશં
    પરાં ભક્તિમાસાદ્ય યં યે નમન્તિ ।
મૃતૌ નિર્ભયાસ્તે જનાસ્તં ભજન્તે
    હૃદમ્ભોજમધ્યે સદાસીનમીશમ્ ॥ ૩૯॥

ભુજઙ્ગપ્રિયાકલ્પ શમ્ભો મયૈવં
    ભુજઙ્ગપ્રયાતેન વૃત્તેન ક્લૃપ્તમ્ ।
નરઃ સ્તોત્રમેતત્પઠિત્વોરુભક્ત્યા
    સુપુત્રાયુરારોગ્યમૈશ્વર્યમેતિ ॥ ૪૦॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવત્પાદ કૃતૌ
શિવભુજઙ્ગં સમ્પૂર્ણમ્ ॥

Encoded and proofread by KamakShi kAmAkShi7 at gmail.com

*Shivabhujangam*

pdf was typeset on October 24, 2023

Please send corrections to *sanskrit@cheerful.com*